श्रीमते रामानुजाय नमः

## श्री अनन्दाऴ्वार् तनियन्

अखिलात्म गुणावासम् अज्ञान तिमिरापहम् ।
आस्रितानाम् सुचरणम् वन्दे अनन्तार्य देशिकम् ॥

श्रीमद् रामानुजाचार्य श्रीपादाम्बोरुहद्वयम् ।
सदुत्तमाङ्ग सन्तार्यम् अनन्तार्यमहम् भजे ॥

# श्रीगोदा चतुःश्लोकी

नित्या भूषा निगमशिरसां निस्समोत्तुङ्गवार्ता
कान्तो यस्याः कचविलुलितैः कामुको माल्यरत्नैः ।
सूक्त्या यस्याः श्रुतिसुभगया सुप्रभाता धरित्री
सैषा देवी सकल जननि सिञ्चतां मामपाङ्गैः ॥ (1)

माता चेत्तुलसी पिता यदि तव विष्णुचित्तो महान्
भ्राता चेद्यतिशेखरः प्रियतमः श्रीरङ्गधामा यदि ।
ज्ञातारस्तनयाः त्वदुक्तिसरसस्तन्येन संवर्धिताः
गोदा देवी कथं त्वमन्यसुलभा साधारणा श्रीरसि ॥ (2)

श्रीमते रामानुजाय नमः

कल्पादौ हरिणा स्वयं जनहितं दृष्ट्वैव सर्वात्मनां
प्रोक्तम् स्वस्य च कीर्तनं प्रपदनं स्वस्मै प्रसूनार्पणम् ।
सर्वेषां प्रकटं विधातुमनिशं श्रीधन्विनव्ये पुरे
जातां वैदिकविष्णुचित्ततनयां गोदामुदारांस्तुमः ॥ (3)

आकूतस्य परिष्क्रियामनुपमामासेचनं चक्षुषोः
आनन्दस्य परंपरामनुगुणामारामशैलेशितुः ।
तद्दोर्मध्य किरीटकोटिघटित स्वोच्छिष्ट कस्तूरिका
माल्यामोदसमेधितात्मविभवां गोदामुदारांस्तुमः ॥ (4)